श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्र महादेशिकैरनुगृहीतं

# ॥ श्री लक्ष्मीनृसिंहमङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनृसिंहमङ्गळम् ॥

मङ्गळं श्रीगुरुभ्योऽस्तु तद्गुरूणां च मङ्गळम्।
तत्राद्यगुरवे नित्यं श्रीनृसिंहाय मङ्गळम् ॥ 1 ॥

शेषिणे सर्वभूतानां सर्वलोकहितैषिणे।
भद्रायान्तर्यमयते श्रीनृसिंहाय मङ्गळम् ॥ 2 ॥

सर्वव्याप्तिमते नित्यं दिव्यमङ्गळमूर्तये।
सर्वत्र परिपूर्णाय श्रीनृसिंहाय मङ्गळम् ॥ 3 ॥

दानवेन्द्रशिशोर्वाक्यं कर्तुं सत्यं महीतले।
स्तम्भाज्जाताय दिव्याय श्रीनृसिंहाय मङ्गळम् ॥ 4 ॥

मत्तद्विपनिभं दैत्यं नखाग्रैर्वज्रसन्निभैः।
सद्यो हन्त्रे च तं क्रोधात् श्रीनृसिंहाय मङ्गळम् ॥ 5 ॥

सटापटलभीमाय प्रह्लादानन्ददायिने।
नमस्कृताय देवाद्यैः श्रीनृसिंहाय मङ्गळम् ॥ 6 ॥

दैत्येन्द्रपुत्रं प्रह्लादं अभिषिच्य कृताञ्जलिम्।
सन्तुष्टहृदयायाशु श्रीनृसिंहाय मङ्गळम् ॥ 7 ॥

क्षेत्रे त्वहोबिले दिव्ये गरुडाद्रौ कृपावशात्।
ज्वालादिनवरूपाय श्रीनृसिंहाय मङ्गळम् ॥ 8 ॥

आश्रिताभीष्टदानाय स्वाराधनपरान् गुरून्।
संप्राप्य हृष्टचित्ताय श्रीनृसिंहाय मङ्गळम् ॥ 9 ॥

नित्याराधनतुष्टाय नित्यभोगप्रदायिने।
नित्यसञ्चारदक्षाय श्रीनृसिंहाय मङ्गळम्॥ **10** ॥

मङ्गळम् श्रीनृसिंहस्य यः पठेत् प्रत्यहं शुभम्।
लक्ष्मीनृसिंहकरुणा दद्यात् तस्य सुमङ्गळम्॥ **11** ॥

इत्थं श्रीवेदचूडार्ययतीन्द्रेण कृतं शुभम्।
मङ्गळं श्रीनृसिंहस्य जीयादाचन्द्रतारकम्॥ **12** ॥

॥ इति श्री लक्ष्मीनृसिंहमङ्गळं समाप्तम्॥